दिनाङ्क :-05.10.2025

प्रात: - 06:55

## प्रधानमन्त्री-युवयोजना

प्रधानमन्त्री नरेन्द्रमोदी आश्वस्तिम् अददात् यत् एन्. डी. ए. इत्यस्य सर्वकारः कौशलविकासेन सह नवाचाराय च प्रबलं ध्यानं दत्त्वा भविष्यस्य नेतृत्वाय युवशक्तिं सज्जीकरोतीति। नवदेहल्याः विज्ञानभवने कौशल-दीक्षान्त-समारोहावसरे, सः द्विषष्टि- सहस्रकोटिरूप्यकाणां विविध-युवकेन्द्रीकृतोपक्रमाणां अनावरणम् अकरोत्, येन सम्पूर्णे देशे शिक्षायाः, कौशलस्य, उद्यमशीलतायाः च निर्णायकप्रेरणा प्राप्स्यते। अस्मिन् अवसरे, स:अद्यतनीकृत-आई. टि. आई. इत्यस्य पी एम-सेतु इत्यस्य माध्यमेन प्रधानमन्त्री-कौशल-वृत्ति-निर्माणेति योजनायाः उद्घाटनमपि कृतवान्।

## यूके प्रधानमन्त्रिणः-भारत भ्रमणम्

युनैटेड् किङ्गडम इति देशस्य प्रधानमन्त्री कीर् स्टार्मर् इत्येषः अस्य मासस्य अष्टम-दिनाङ्कादारभ्य द्विदिवसीयायां भारतयात्रायाम् आगमिष्यति। एषा प्रधानमन्त्रिणः स्टार्मर् वर्यस्य भारतस्य अन्तिमम् आधिकारिकं भ्रमणम् भविष्यति। विदेशमन्त्रालयेन उक्तं यत्, नवमे अक्टोबरेति दिनाङ्के मुम्बै-नगरे, प्रधानमन्त्री नरेन्द्रमोदी, तस्य यूके-समकक्षियेण सह विजन 2035 इति कार्यसूच्यानुरूपम् भारत-यूके व्यापक-सामरिक-सहभागित्वान्तर्गतस्य विविधक्षेत्रेषु सम्भाव्य प्रगतिं समीक्षितुं शक्नोति। एषा व्यापार-निवेश- प्रौद्योगिकनवाचार- रक्षा-सुरक्षा-जलवायु-ऊर्जा- स्वास्थ्य- शिक्षा- जनसम्पर्कादिषु प्रमुखबिन्दुषु केन्द्रीकृता कालबद्धा च दश-वर्षीया कार्ययोजना अस्ति।

## सुभान्शु शुक्ला-शिक्षाविभागे

भारतीय-वायुसेनायाः ग्रूप्-क्याप्टन इति पदधारी इसरो इति पक्षतश्च अन्ताराष्ट्रिय-अन्तरिक्ष-केन्द्रस्य भ्रमणकर्ता प्रथमः भारतीयः शुभांशु-शुक्लः, ह्यः नवदेहल्यां विद्यालयीय-शिक्षा-साक्षरता-विभागस्य सचिवेन सञ्जय्-कुमारेण सह मिलितवान्। सामाजिक-प्रसारमाध्यमे शिक्षा-मन्त्रालयः अवदत् यत् सभैषा विकसित-भारत-बिल्डेथान-2025 इति विषये केन्द्रिता आसीत्, यत्र प्रधानमन्त्रिणः नरेन्द्र-मोदिनः दूरदृष्ट्यानुरूपम् छात्राणां मध्ये वैज्ञानिक-स्वभावस्य, सृजनात्मकतायाः, नवान्वेषणस्य च पोषणार्थं आसीत्, येन ते विकसितभारतं प्रति भारतस्य यात्रायां योगदानं दातुं सशक्ताः भवन्त्विति भावः निहितः आसीत्। श्रीशुक्लः अपि विकसितभारत-बिल्डेथान्-2025 इत्यस्य ब्राण्ड्-एम्बेसेडर इति रूपेण नियुक्तः अस्ति।

<u>अमित शाह-गोवा भ्रमणम्</u>

केन्द्रीय-गृह-मन्त्री तथा सहकार-मन्त्री अमितशाहः ह्यः तालेगाव्-नगरस्य डा. श्यामा प्रसाद-मुखर्जी-इन्डोर्-क्रीडागृहे आयोजिते कार्यक्रमे गोवा-सर्वकारस्य प्रमुख-कल्याण-कार्यक्रमस्य 'म्हाजे-घर्-योजना' इत्यस्य उद्घाटनम् अकरोत्। सर्वकारीय-सामुदायिक-भूमौ निर्मितानां गृहाणां नियमितीकरणं, दीर्घकालीननिवासिनां कृते स्वामित्व-अधिकारान् प्रदातुं च इयं योजना अस्ति।

<u>ट्रंप गाजा युद्धविरामः</u>

अमरीका-देशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्पः उदघोषयत् यत् गाजा-युद्धविरामस्य विषये वार्तायाः अनन्तरं इस्रेल्-देशः प्रारम्भिक-प्रत्यागमन-पङ्क्तिं स्वीकृतवान् इति, तथा च अयं प्रस्तावः फिलिस्तिन-उग्रवादी-सङ्घटनेन हमासेन सह सहभागितः अस्तीति। सामाजिक-माध्यम-मञ्चे उद्घोषणं कुर्वन् राष्ट्रपतिः ट्रम्पः अवदत् यत् एकदा हमास् इत्यनेन व्यवस्थायाः पुष्टिः क्रियते चेत् तत्क्षणमेव युद्धविरामस्य प्रभावः भविष्यति इति।

यू. आई. डी. ए. आई.:

भारतीय-विशिष्ट-अभिज्ञान-प्राधिकरणेन सप्ततः पञ्चदश-वर्षपर्यन्तानां बालानां कृते आधार-बयोमॆट्रिक्- अद्यतनीकरणाय शुल्कमदेयं भविष््यति इति सूचनाप्रौद्योगिकी-मन्त्रालयः एकस्मिन् वक्तव्ये अवदत् ।

महिलानां एकदिवसीय क्रिकेट विश्व चषकस्पर्धा

आई. सी. सी. महिला-एकदिवसीयायां क्रिकेट्-विश्वकप्- इति-क्रीडायां, अद्य कोलम्बो-नगरस्य आर्. प्रेमदासा-क्रीडाङ्गणे, भारतदेश: स्पर्धायाः द्वितीयक्रीडायां पाकिस्तानेन सह क्रीडिष््यति।

बैडमिन्टन्:

बैडमिण्टन्-क्रीडायां, अद्य आबू-धाबी-नगरस्य खलीफा-बिन्-जायद्-क्रीडाङ्गणे आल्-ऐन्-मास्टर्स्-2025 इत्यस्य अखिलभारतीय-महिला-एकल-अन्तिमस्पर्धायां उदयोन्मुख-भारतीय-शटलर्-क्रीडिके तस्नीम्-मीर्, श्रीयांशी-वालिशेट्टी च परस्परं क्रीडत:।

विश्व-पारा-अथ्लेटिक्स्

श्वः नवदेहली-नगरे विश्व-पैरा-अथ्लेटिक्स्-च्याम्पियन्शिप्-2025 इत्यस्य उपान्त्यदिने भारतदेश: त्रीणि पदकानि जितवान्। अनेन सह, देशः आहत्य षोडश पदकानि प्राप्नोत्, यस्मिन् षट् स्वर्ण- सप्त रजत-पञ्च कांस्यपदकानि च सन्ति।